॥ श्रीकृष्णाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

# ॥ कार्यकारणभावविचारः ॥

## उपक्रमः

अजायमानं बहुधा विजातं सृष्टिर्हि स्रष्टुः खलु रूपमेव ॥
सृष्टास्तु जीवाः पुनरल्पवित्तया सृष्ट्यैकरूपेण विजातमाहुः ॥१॥
बाह्याभ्यन्तरयोर्द्वयोघटनयोः पूर्वापरीभूतयोः
काले कारणकार्यधीरपि तयोरुज्जृम्भते द्रष्टरि ॥
आकीटादा च प्राज्ञं बहुविधदृष्टान्तेषु सम्प्रत्ययाच्च
सृष्टेर्हेतावदृष्टे कथमपि विविधा हन्त दृष्टान्तमूला ॥२॥
सृष्ट्युत्पत्तिप्रक्रियायां विवादाः बहुविधोदिताः ॥
आरम्भ-परिणति-विवर्त-प्रतीत्यसमुत्पादरूपास्तु ॥३॥
मिथो नूनं विरुद्धास्ते परन्तु श्रौतप्रक्रिया ॥
यथान्तर्भावयन्ती तान् तद् वर्णयितुमारभे ॥४॥
आरम्भवादः परिणामवादो विवर्तवादश्च बहुप्रभेदाः ॥
भेदोपभेदैः बहवोऽत्र वादिषु विवादसंवाद भुवो भवन्ति ॥५॥

## तत्रारम्भवादविमर्शः

पटस्तन्तुभिरारब्धो यथा तन्तुषु जन्यते ॥
परमाणुसमारब्धा सृष्टिस्तद्वद् विजायते ॥६॥
केचित्सकर्तृकां प्राहुरपरेतु स्वभावतः ॥
कर्तुस्तत्रानपेक्षैव उपभेदोत्र तस्य वै ॥७॥
कारणे समवेतं तत् कार्यञ्चोत्पद्यते ततः ॥



कार्यकारणसम्बन्धो नित्यो नैयायिकैः मतः ॥८॥
कार्यरूपे पटेऽनित्ये पटत्वन्तु सनातनम् ॥
सामान्यरूपा सा जातिः समवेता पटे मता ॥९॥
सम्बन्धिनोरनित्यत्वे सम्बन्धस्यतु नित्यता ॥
विडम्बनेयमथवा दृश्यवस्तूभयात्मता ॥१०॥
नित्यानित्यरूपभेदः पिण्डैक्ये चोभयात्मके ॥
अपृथग्भातजातिव्यक्त्योर्विभेदो निरूपितः ॥११॥
कार्यकारणयोरेवं गुणेभ्यो गुणिनस्तथा ॥
समवायस्तु तादात्म्ये वेदान्तेऽन्तर्गतो मतः ॥१२॥
एतावाँस्तु विशेषोऽत्र तादात्म्यसमवाययोः ॥
स स्वसम्बन्धिभिन्नोवै तादात्म्यं न तथा क्वचित् ॥१३॥
स्वरूपाख्यस्तु सम्बन्धो यथा निर्वाहको मतः ॥
स्वपरयोस्तथैवात्र तादात्म्यञ्चाभ्युपेयते ॥१४॥
सृष्ट्वा सृष्टिं हि परमात्मा ''तत्रैवानुप्राविशत्''[१] ॥
तादात्म्येनानुप्रवेशात् ''स सर्वमभवत्'' पुनः[२] ॥१५॥
एवं स्वीकरणात् कर्तुरीशस्य व्यापकस्य वै ॥
अपृथक्सिद्धस्रष्टोर्वै बाह्यसृष्टेरसम्भवात् ॥१६॥
परमाणुसमारब्धसृष्टेः कर्तुश्च सर्वथा ॥
तादात्म्यस्याभ्युपेतत्वात् सह्यभेदाविभेदतः ॥१७॥
घटे घटत्वाविर्भावे कतरत् स्यात् नियामकः ॥
किं घटोऽथ घटत्वं वा नोभयं तर्कदोषतः ॥१८॥
कर्तृव्यापारतस्तावन्मृद्याविर्भूयते घटः ॥
तिरोहितं यत्पूर्वमासीत् सैषाविर्भूतिप्रक्रिया ॥१९॥
स्वोपादानसमारब्धा प्रकटावयवेषु वा[३] ॥
आविर्भवति सृष्टिर्हि प्रक्रियैषोपपद्यते ॥२०॥
कार्यकारणभावीयारम्भवादस्य प्रक्रिया ॥

आविर्भावप्रक्रियायामार्जवेन समाविशेत् ॥२१॥
सृष्टयेकदेशभूतस्य तन्त्वारब्धपटस्य वै ॥
दृष्टान्तोपजीवनेन कृत्स्नसृष्टिरपाकृता ॥२२॥
एवमारम्भवादस्याविर्भावे समाहृतिः ॥
प्रदर्श्य परिणामस्य प्रक्रिया चाथ वर्ण्यते ॥२३॥

## विकृताविकृतपरिणामविमर्शः

परिणामप्रक्रिये द्वेधा धर्म-धर्मिविभेदतः ॥
अर्थक्रियारूपनाम्ना विकृतिः धर्मिणः क्वचित् ॥२४॥
क्वचिद् द्रव्यन्तु कस्याश्चित् क्रियायाः विकृतिर्भवेत् ॥
कारणं विकृतं भूत्वा दुग्धं दधि विजायते ॥२५॥
स्थित्वा ह्यविकृतं स्वर्णं कुण्डलाकारतां व्रजेत् ॥
दध्नः पुनर्दुग्धभावो लोके नैवोपलभ्यते ॥२६॥
कुण्डलस्य पुनः शक्या शुद्धात्र स्वर्णरूपता ॥
ब्रह्मणो ह्यविकारित्वं जगतश्च विकारता ॥२७॥
उक्ते श्रुतावुभे तस्याविकृतिः परिणामिता ॥
विकारिपरिणामस्तु दुग्धदध्नोर्हि लौकिकः ॥२८॥
न श्रौते ब्रह्मणि त्वेषा "**तज्जलानि**"[४]ति वाक्यतः ॥
यतः सृष्टयेकदेशेहि दृष्टान्ते दधिदुग्धयोः ॥२९॥
नैवं ब्रह्मसृष्टौ हि सामञ्जस्येन सिद्ध्यति ॥
विकारिपरिणामो वै लोकसिद्धस्तु दृश्यते ॥३०॥
आविर्भावप्रक्रियातः संगतोऽप्युपलभ्यते ॥
न ह्यत्र बहुवक्तव्यं किञ्चित्तेनावशिष्यते ॥३१॥
तथापि ब्रह्मवादेहि प्रधानपुरुषावुभौ ॥
सच्चिदंशौ ब्रह्मणो हि विशेषोऽतो विवक्षितः ॥३२॥
ब्रह्मणो निर्विकारस्य परिणामेऽविकारिता ॥



दुग्धं परिणमते यद्वद् निःशेषं दधिभावतः ॥३३॥
तद्वत्प्रकृतिः सृष्टिः भूत्वा विकृतितां व्रजेत् ॥
पयस्यातञ्चनेनैवंभावः चेतनहेतुकः ॥३४॥
चेतनं निर्विकारि तत्संयोगात् परिणामिता ॥
निमित्तं कारणमन्यत् परिणामीतरत् पुनः ॥३५॥
पुरुषप्रकृतिद्वैतम् अश्रौतमतमास्थितम् ॥
भोग्येह प्रकृतिर्ज्ञेया भोक्तारः पुरुषाः मताः ॥३६॥
सविकारनिर्विकारभोग्यभोक्त्रात्मकं जगत् ॥
श्वेताश्वेतरश्रुतेरेतत्प्रतीपं मतमुच्यते ॥३७॥
भोग्यं भोक्ता प्रेरिता च ब्रह्म तत्त्रितयात्मकम्[५] ॥
त्रयाणां तेन तादात्म्यं नाभेदो भेदएव वा ॥३८॥
ब्रह्मैवेकं हि सर्वस्योपादानत्वेन कीर्तितम् ॥
सदेवेदमग्रआसीद् ब्रह्मैकं द्वैतवर्जितम्[६] ॥३९॥
नाम-रूपात्मना स्वस्य कर्मणा व्याकृतिं पुनः ॥
चकारातो हि ब्रह्मैक्यं तत्त्रित्वेऽपि[७] श्रुतेर्मतम् ॥४०॥
ब्रह्मणो निर्विकारस्य परिणामेऽविकारता ॥
कुण्डलत्वेन सौवर्णं परिणामोपमा मता ॥४१॥
अव्यक्तायास्तु प्रकृतेः महदादिक्रमात्पुनः ॥
अव्यक्ततात्यागेनैव ततो ज्ञेया विकारिता ॥४२॥
अतस्तत्रापि प्रक्रिया चाविर्भावात्मिका मता ॥
सच्चिदानन्दरूपस्य सृष्टयुपादानता यदि ॥४३॥
इष्टा चेदविकारित्वविकारित्वे कुतो नहि ?॥
कार्यकारणभावस्यावान्तरप्रक्रियासु वै ॥४४॥
सदंशे त्वविकृतेऽपि दुग्धस्यतु विकारिता ॥
अभीष्टा दधिभावेन दुग्धाभावतः पुनः ॥४५॥
ब्रह्मसृष्टयोरविकृता परिणामस्य प्रक्रिया ॥

तत्सृष्टावान्तरयोस्तु कार्यकारणयोर्मता ॥४६॥
तथा तथाविर्भावोवै ब्रह्मणो हि श्रुतौ मतः ॥
**'सर्वं खल्विदं ब्रह्मे'**'ति श्रुतेः प्रामाण्यतः सदा ॥४७॥
सांख्य-वेदान्तयोरेवं प्रक्रिये द्वे सुसंगते ॥
निरूपिते येन कापि शंक्या नेह विसंगतिः ॥४८॥
श्वेताश्वतरविरुद्धा या सांख्यप्रक्रियोदिता ॥
सा प्रतीपानभ्युपेया ब्राह्मैक्येन विरोधतः ॥४९॥
भोग्येह प्रकृतिः प्रोक्ता भोक्तारः पुरुषाः पुनः ॥
सविकार-निर्विकार-भोग्य-भोक्त्रात्मकं जगत्॥५०॥
भोग्यं भोक्तारं प्रेरितारञ्च सर्वं
ब्रह्मैवेतद् ब्रह्मभिन्नं न किञ्चित् ॥
संयोगोऽपि भोग्यभोक्त्रोस्तु पूर्वः
वियोगोऽपि ब्रह्मणा कारितोऽस्ति ॥५१॥
त्रयाणामपि तादात्म्यं नाभेदो भेदएव वा ॥
ब्रह्मैवैकं सर्वरूपोपादानत्वेन वर्णितम् ॥५२॥
सदेवैकमग्र आसीद् ब्रह्मैकं द्वैतवर्जितम् ॥
नामरूपात्मना स्वस्य कर्मणा व्याकृतिं तथा ॥५३॥
त्रयं बिभर्ति तच्चैकं नामरूपे च कर्म च ॥
तेषां त्रित्वेऽपि ब्रह्मैकं ब्रह्मैक्ये तानि च त्रिधा[९] ॥५४॥
बृहदारण्यकोक्तं तद् एतादृग्ब्रह्म वर्तते ॥
पुरुषप्रधानयोर्द्वैतं यत्रैकीभवति पुनः ॥५५॥
सांख्यवेदान्तयोरेषा प्रक्रिया संगता मिथः ॥
विसंगतेतराऽग्राह्या शब्दप्रामाण्यवादिभिः ॥५६॥

### योगसूत्रभाष्योक्तप्रक्रियाविमर्शः

व्यासभाष्ये कारणानां प्रभेदो यश्च दर्शितः ॥



तेषामपि समावेशो यथा तत्तु विचार्यते ॥५७॥
उत्पत्तिस्थितिरभिव्यक्तिविकृतिप्रत्ययाप्तयः ॥
वियोगान्यत्वधृतयः कारणं नवधोदितम् ॥५८॥
मनस्तूत्पादकं ज्ञाने चाहारःस्थितिकारणम् ॥
आलोकाद्रूपव्यक्तेश्च भुक्तान्नविकृतिः पुनः ॥५९॥
जाठराग्निवशाज्ज्ञेया धूमोऽग्नेस्तु प्रमापकः ॥
विवेको लभते योगाद् वियोगः काष्ठछेदनात् ॥६०॥
स्वर्णत्वेन चैक्येऽपि कुण्डलादेर्मिथोऽन्यता ॥
स्वर्णकारकृता चैवं स्तम्भादेर्धृतिहेतुता ॥६१॥
भवनादेर्यथा वर्ण्या चैवं हि नवधा तु सा ॥
तथातथाविर्भावात्तु नात्र वाच्यमितः परम् ॥६२॥
सृष्ट्युत्पत्तिस्थिती तावद् ब्रह्मणः श्रुतिदर्शिते ॥
रूपनामाभिव्यक्तिश्च सृष्टिरूपेण ब्रह्मणः ॥६३॥
**''तमेव भान्तं ह्यनुभाति सर्वं**
**तस्य भासा सर्वमिदं विभाति''**[१०] ॥
सृष्टौ सदंशे खलु रूपव्यक्तिर्
नामाभिव्यक्तिस्तु चिदंशगा मता ॥६४॥
काल-कर्म-स्वभावा वै सृष्टेर्हेतुतया मताः ॥
ब्रह्मशक्तिस्वरूपास्तु ब्रह्मणो न पृथक् मताः ॥६५॥
ज्ञानन्तु योगलभ्यं यत् तत्त्वंशात्मकमेव हि ॥
तत्पुनर्देवध्यानेन तद्भर्गोशकृतं मतम् ॥६६॥
तेनैव भगवत्प्राप्तिरन्यैस्तु प्राकृतस्य वै ॥
फलस्य प्राप्तिर्विज्ञेया **''यमेवैषे''**ति[११] वाक्यतः ॥६७॥
स्वप्राप्तौ प्रापिका भक्तिरनन्या[१२] वरणात्तु सा ॥
स्वशक्त्याऽविद्यया स्वस्माद् वियोगजनकोऽपि सः ॥६८॥
स्वभाव-कर्म-कालादिशक्तिभिः सर्वधारकः ॥

ब्रह्मैव विविधैः रूपैस्त्वाविर्भवति कारणैः॥६९॥
भावाभावात्मकं तावत् कारणं तार्किकैः श्रितम्॥
भावात्मकेऽसमवायि च समवायि तथेतरत्॥७०॥
प्रागभावो ह्यभावेषु कारणत्वेन वर्णितः॥
ततस्तु जननात्प्राक्तु कार्यस्यासत्त्वमास्थितम्॥७१॥
सांख्यानान्तु मते सत्त्वं कार्यकारणयोर्मतम्॥
आविर्भावतिरोभावप्रक्रिया तत्र दर्शिता॥७२॥

### विवर्तवादविमर्शः

अथात्र शांकराणान्तु कार्यानिर्वाच्यवादिनाम्॥
मते विवर्तोपादानं पारमार्थिकमिष्यते॥७३॥
परिणाम्युपादानन्तु कार्यवन्नाप्यसन्न सत्॥
व्यवस्थया कारणत्वं नैमित्तिकमपि द्विधा॥७४॥
रज्जुः सर्पतया विवर्ततइति दृष्ट्वाहि सृष्टौ क्वचित्
सृष्टिश्चाप्यखिलापि ब्रह्मणि तथा स्वाविद्यया कल्पिता॥
तच्चात्माह्यभवत्स्वयं[१३] खलु पुनः सर्वं हि दृग्गोचरम्[१४]
श्रुत्येकाधिगतं भ्रमादपिच ते मुञ्चन्ति दृष्टान्तिनः॥७५॥
ब्रह्मैकमेवाद्वितीयं चेत्पुनः पारमार्थिकम्॥
नहि माया द्वितीया वै ततो भवितुमर्हति॥७६॥
सती वाप्यसती वापि यद्वोभयविलक्षणा॥
ब्रह्माद्वैतेऽन्तर्गता चेद् न कुतः पारमार्थिकी?॥७७॥
द्वितीयत्वेतु तस्याः स्याद् ब्रह्माद्वैतक्षतिः स्फुटा॥
अनिर्वाच्यत्वमेतस्याः सदसत्त्वेन स्वीकृतम्॥७८॥
नचैकत्व-बहुत्वाभ्यामतएवं निगद्यते॥
एक्यं द्वित्वं बहुत्वं वा न सत्त्वासत्त्वनिर्भरम्॥७९॥
असत्येप्यथ सत्येऽपि संख्यानुगमस्वीकृतेः॥



नामरूपे मायिकेतु स्वीकृते शांकरैस्तदा॥८०॥
अस्ति भाति प्रियं चेति ब्राह्मिकं समुदाहृतम्॥
रूपादिषु त्रिषु तत्र चास्त्यादीनान्तु दर्शनम्॥८१॥
ब्रह्मतादात्म्यहेतुर्वै स्वीकर्तव्यो कुतो नहि?॥
भ्रान्त्या चेदुच्यते तत्र ब्रह्मैक्यं बाधितं भवेत्॥८२॥
"त्रयं सदयमेकात्मा ह्यात्मैकः सन्नपि त्रयम्"[१५]॥
श्रुत्या कण्ठोक्तद्वैविध्यं बाधस्तस्य न शक्यते॥८३॥
रज्जौ सर्पविवर्तो यो भाति सर्पे तिरोहिते॥
नेत्रस्य सर्पसंयोगाजन्या सादृश्यजा मतिः॥८४॥
सर्पत्वस्य विकल्पोऽतो बुद्ध्याविर्भूत उच्यते॥
रज्जौ सर्पविवर्तोऽयमसन्न भवितुं क्षमः॥८५॥
आविर्भावतिरोभावप्रक्रियैवं हि संगता॥
विवर्तवादेऽपि पुनस्तत्र शंका न काचन॥८६॥

### सौगतमतविमर्शः

सौगतानां मते तावत् प्रतीत्योत्पन्नवादिनाम्॥
कारणञ्चापि कार्यञ्च असती स्वीकृते पुनः॥८७॥
नानुपमृद्य बीजं वै अंकुरोत्पत्ति सम्भवा॥
ततश्च कारणासत्त्वं कार्यञ्चाप्यसदुच्यते॥८८॥
सतो यतो नचोत्पत्तिः नतरामसतः पुनः॥
कार्यकारणयोरेवमसत्त्वेऽपि यथा तथा॥८९॥
अनेकहेतुसंघातमनु यद् भाति चोत्तरम्॥
पूर्वेषु कारणत्वस्य भ्रान्तिरुत्तरभाविषु॥९०॥
कार्यत्वभ्रान्तिरपरा प्रतीत्योत्पन्नता मता॥
सर्वेषामपि वस्तूनां स्वस्वलक्षणशालिनाम्॥९१॥
सामान्यलक्षणाभावात् क्षणिकानान्तु सर्वथा॥

यथालातचक्रभ्रान्तिश्चक्राभावेऽपि जायते॥९२॥
सृष्ट्येकदेशदृष्टान्ताद् अखिलसृष्टिवर्णना॥
आविर्भावप्रक्रियाऽत्र सुगमा चान्वितापि वै॥९३॥
वस्त्वसत्त्वेऽपि बुद्धौ तद्वृत्तेश्चाविर्भावतः॥
अथातः शाब्दिकानाञ्च मतमत्र विचार्यते॥९४॥

### वैयाकरणदर्शनविमर्शः

शाब्दिकानां मते चात्र क्रियाकारकभेदतः॥
कार्यकारणभावस्तु त्रिधा समुदितो मतः॥९५॥
कारकेषुतु स्वातन्त्र्यास्वातन्त्र्येण द्विधा मता॥
क्रियानिष्पत्तये वक्त्रा स्वातन्त्र्येण विवक्षितः॥९६॥
योऽसौ कर्तेति सम्प्रोक्तोऽन्येतु कर्मादिकारकाः॥
कार्यभूता क्रिया तेषामेषा रीतिरुदीरिता॥९७॥
वक्तुर्विवक्षाविर्भावे स्वातन्त्र्येणतु वस्तुनः॥
कर्ता तत्राविर्भवेच्च वाग्व्यापारार्थबुद्धिगः॥९८॥
अन्येषु पारतन्त्र्येण क्रियाकारकता मता॥
क्रिया क्वचित्कर्मरूपा ज्ञानेच्छायत्नसम्भवाः॥९९॥
क्वचिद् वस्तुस्वभावात्तु ज्ञानेच्छायत्नवर्जिता॥
क्रियाविर्भवति सृष्टौ तादात्म्यादेव सर्वथा॥१००॥
क्रियाकारकभावात्मा ब्रह्मैव चोदितं तथा॥
तथोपनिषदि प्रोक्ते द्वे रूपे ब्रह्मणो यतः॥१०१॥
मूर्तामूर्तमृत्यामृतचलाचलविभेदतः॥
द्रव्यं मूर्तमित्याहुः क्रियाऽमूर्ता भवेत्पुनः॥१०२॥
क्रियाविरहितं द्रव्यमचलं सचलं पुनः॥
क्रियया सहितं ज्ञेयमाविर्भावविभेदतः॥१०३॥
क्रियाविर्भूयते द्रव्यात्तिरोभूतात् क्वचित् तथा॥



तिरोहितक्रियायां हि द्रव्यमाविर्भवेत् क्वचित् ॥१०४॥
क्वचिच्च ह्युभयोराविर्भावस्तु नोभयोरपि॥
नद्युद्धृतजले यद्वत् प्रवाहत्वतिरोहतिः॥१०५॥
जलोत्सेके प्रवहमाणे नदीराविर्भवेत् क्वचित्॥
शाब्दिकानां मते तावद् न दृष्टान्तोपजीविता॥१०६॥
यतो वाग् बृहती प्रोक्ता ब्रह्मवत् सर्वरूपिणी॥
**''यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा॥१०७॥**
**स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः॥**
**एतन्नानाविधं विश्वमात्मसृष्टमधोक्षजः॥१०८॥**
**आत्मनानुप्रविश्यात्मन् प्राणो जीवो बिभर्त्यजः''**[१६]॥
इति श्रीमद्भागवते दशमस्कन्धवर्णिते॥१०९॥
तस्मिन्नेवास्त्यतः सर्व-क्रियाकारकरूपता॥
सुसंगता प्रक्रियैषा वेदान्तब्रह्मवाचिका॥११०॥

### अरस्त्वभिमतकारणविमर्शः

अथो यवनदेशीयोऽरस्तुश्च चिन्तको महान्॥
न्यरूपयच्चातुर्विध्यं कारणानां स्वचिन्तने॥१११॥
उपादानं निमित्तं च प्रत्ययश्च प्रयोजनम्॥
आद्यत्रयं पूर्ववृत्ति तूर्ये तूत्तरवर्तिता॥११२॥
आद्यद्वयन्तु सामान्यं शेषे कर्तुर्हि बुद्धिगे॥
ज्ञानेच्छायत्नवान् कर्ता कारणत्वेन चेष्यते॥११३॥
तज्ज्ञानगः प्रत्ययो वै तदिच्छायां प्रयोजनम्॥
कार्योपादानतो भिन्नः कर्ता भावयिता भवेत्॥११४॥
यस्मादाविर्भावयित्री तज्ज्ञानेच्छाकृतिर्मता॥
निमित्तं करणादीनां व्यापारः कर्तृयन्त्रितः॥११५॥
उपादानन्तु कार्याविर्भावाधारतया मतम्॥

एवं चतुर्विधानान्तु स्वरूपं तन्मतोदितम्॥११६॥
यथोर्णनाभिः सृजते गृह्यते च...
पुरुषात्सतः केशलोमानि चैव
तथाक्षरात्सम्भवतीह विश्वं [१७]
स्वभावसामर्थ्यविभेदतश्च॥११७॥

**उपसंहारः**

कार्यकारणभावानां प्रभेदादुत्थितातु या॥
मत्यामसंगतिः शंकापंकेनेव कलंकिताः॥११८॥
प्रक्षालिता श्रुतिप्रोक्तप्रक्रियायाः विमर्शनात्॥
ब्रह्मवत् सर्वकारणानां समावेशकारिणी॥११९॥
ब्रह्मवत् तस्य शक्ती चाविर्भावतिरोहती॥
नानावादानुरोधिन्यौ सर्ववादातिगे तथा॥१२०॥
श्रीमदाचार्यचरणानुग्रहाकांक्षिणो मम॥
दीक्षितात्मजश्यामस्य कृतिः सम्पूर्णतामगात्॥१२१॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण
विरचितः कार्यकारणभावविचारः

.......

१. तैत्ति.उप.२।६।१.
२.बृह.उप.१।४।१०.
३. संहतैः उपचितैः अवयवैः गुप्तो अवयवी प्रकटीक्रियते. भाग.सुबो.२।१।२४.
४. छान्दो.उप.३।१४।१.
५. श्वेता.उप.१।१२.



६. सदेव सोम्य इदम् अग्र आसीद् एकमेवाद्वितीयः (छान्दो.उप.६।२।१)
७. सर्वाणि नामानि रूपाणि कर्माणि ब्रह्म बिभर्ति तदेतत् त्रयं सद् एकमयमात्मा आत्मा उ एकः सन् एतत् त्रयम् (बृह.उप.१।६।३)
८. छान्दो.उप.३।१४।१.
९. बृह.उप.१।६।३
१०. कठोप.२।२।१५.
११. कठोप.१।२।२३.
१२. भक्त्या त्वनन्या शक्य (भग.गीता.११।५४).
१३. तदात्मानं स्वयम् अकुरुत (तैत्ति.उप.२।७).
१४. सर्वं खलु इदं ब्रह्म (छान्दो.उप.३।१४।१).
१५. बृह.उप.१।६।३.
१६.
१७.
१८. भाग.पुरा.१०।८२।४-५.१७.
१९. मुण्ड.१।१।७.